लोचना, स्त्री, (लोचते पर्य्यालोचयतीति । लोच + ल्युः । टाप् ।) बुद्धशक्तिभेदः । अस्याः प्रमाणं पर्य्यायाश्च लोकेश्वरात्मजाशब्दे द्रष्टव्याः ॥

लोचनामयः, पुं, (लोचनयोरामयः ।) चक्षूरोगविशेषः । तत्पर्य्यायः । अभिमन्थः २ । इति त्रिकाण्डशेषः ॥

लोचनी, स्त्री, (लोच्यतेऽनौ । लोच् + ल्युट् । ङीप् ।) महाश्रावणिका । इति राजनिर्घण्टः ॥

लोचमर्कटः, पुं, लोचमस्तकः । इत्यमरटीकायां स्वामी ॥

लोचमस्तकः, पुं, (लोचं दृश्यं मस्तकं मयूरशिखेव यस्य ।) मयूरशिखौषधम् । रुद्रजटा इति ख्यातः । चेचयमानिकेति केचित् । तत्पर्य्यायः । सरान्धा २ कारवी ३ दीप्यः ४ मयूरः ५ । इत्यमरः ॥ लोचमर्कटः ६ । इति भरतः ॥

लोचिका, स्त्री, दधिघृतमर्द्दितोष्णोदकसहितदलितमणलाकारनिर्म्मितघृतभृष्टसमिता । लुचि इति भाषा । इति पाकराजेश्वरः ॥

लोट, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ऋ, अलुलोटत् । लोटति लोकः उन्माद्यतीत्यर्थः । इति दुर्गादासः ॥

लोटुलः, पुं, (लोटतीति । लोट् + बाहुलकात् उलच् ।) अभिलोटकः । इति संक्षिप्तसारोणादिवृत्तिः ॥

लोड, ऋ उन्मादे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) ऋ, अलुलोडत् । इति दुर्गादासः ॥

लोणलवणं, क्ली, (लोणं लवणरसयुक्तं लवणम् ।) लवणलवणम् । इति राजनिर्घण्टः ॥

लोणा, स्त्री, (लवणमस्त्यस्या इति । अच् । टाप् । पृषोदरादित्वात् साधुः ।) क्षुद्राम्लिका । इति राजनिर्घण्टः ॥ (तथास्याः पर्य्यायः ।
"लोणा लोणी च कथिता बृहल्लोणी तु घोटिका ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

लोणारं, क्ली, (लवणं ऋच्छतीति । लवण + ऋ + अण् । पृषोदरादित्वात् साधुः ।) क्षारविशेषः । तत्पर्य्यायः । लवणोत्थम् २ लवणाकरजम् ३ लवणमदः ४ जलजम् ५ लवणक्षारः ६ लवणः ७ । अस्य गुणाः । अत्युष्णत्वम् । तीक्ष्णत्वम् । पित्तवृद्धिकारित्वम् । क्षारत्वम् । ईषल्लवणत्वम् । वातगुल्मादिशूलनाशित्वञ्च । इति राजनिर्घण्टः ॥

लोणाम्ला, स्त्री, क्षुद्राम्लिका । इति राजनिर्घण्टः ॥

लोतं, क्ली, (लुनातीति । लू + "हसिमृग्रिण्वामि-दमिलूपूधुर्विभ्यस्तन्" इति ।" उणा० ३ । ८६ । इति तन् ।) स्तेयधनम् । तत्पर्य्यायः । लोप्त्रम् २ । इति जटाधरः ॥ लोप्त्री ३ लोतम् ४ कुप्यम् ५ । इति शब्दरत्नावली ॥

लोतः, पुं, क्ली, (लुनातीति । लू + "हसिमृग्रिण्वामि-इति ।" उणा० ३।८६ । इति तन् ।) नेत्राम्बु । इति त्रिकाण्डशेषः ॥ चिह्नम् । इति सिद्धान्त-कौमुद्यामुणादिवृत्तिः ॥ लवणम् । अश्रुपातः । इति संक्षिप्तसारोणादिवृत्तिः ॥

लोत्रं, क्ली, (लूनातीति । लू + "सर्व्वधातुभ्यष्ट्रन् ।" उणा० ४ । १५८ । इति ष्ट्रन् । यद्वा, ला + "अशित्रादिभ्य इत्रोत्रौ ।" उणा० ४ । १७२ । इति उत्रः । इत्युज्ज्वलः ।) लोतम् । इति शब्दरत्नावली ॥ नेत्रजलम् । इति संक्षिप्तसारोणादिवृत्तिः ॥

लोधः, पुं, (रुणद्धीति । रुध + अच् । रस्य लः ।) स्वनामख्यातवृक्षः । रक्तवर्णस्य तस्य पर्य्यायः । तिरीटः २ मार्ज्जनः ३ रक्तः ४ लोध्रः ५ तिल्वकः ६ । श्वेतस्य तस्य पर्य्यायः । शुक्लः २ शवरलोध्रः ३ महालोध्रः ४ शावरः ५ । इति रत्नमाला ॥ अस्य गुणाः । अस्रकफवातनाशित्वम् । चक्षुष्यत्वम् । शोथजित्त्वम् । सरत्वञ्च । इति राजवल्लभः ॥

लोध्रः, पुं, (रुणद्धीति । रुध + बाहुलकात् रन् । रस्य लः ।) लोधवृक्षः । (यथा, शिशुपालवधे । ६ । ४६ ।
"अधरेष्वलक्तकरसः सुदृशां
विशदं कपोलभुवि लोध्ररजः ।
नवमञ्जनं नयनपङ्कजयो-
र्विभिदे न शक्रनिहितात् पयसः ॥")
तत्पर्य्यायः । गालवः २ शावरः ३ तिरीटः ४ तिल्वः ५ मार्ज्जनः ६ । इत्यमरः ॥ षट् लोध्रमात्रे लोध इति ख्याते । षट् श्वेतलोध्र इति सुभूतिः ॥ आद्यपादः श्वेतलोध्रे शेषो रक्तलोध्र इति स्वामी ॥ तस्य पर्य्यायान्तरं यथा । लोध्रः ७ भिल्लतरुः ८ तिल्वकः ९ काण्डकीलकः १० लोध्रवृक्षः ११ शम्बरः १२ हस्तिरोध्रकः १३ तिलकः १४ काण्डनीलकः १५ हेमपुष्पकः १६ भिल्ली १७ शावरकः १८ । अस्य गुणाः । कषायत्वम् । शीतत्वम् । वातकफास्रनाशित्वम् । चक्षुष्यत्वम् । विषहृत्त्वम् । तत्र विशिष्टो वल्कलोध्रकः । इति राजनिर्घण्टः ॥ अपि च ।
"लोध्रस्तिल्वस्तिरीटश्च शावरो गालवस्तथा ।
द्वितीयः पट्टिकालोध्रः क्रमुकः स्थूलवल्कलः ॥
जीर्णपत्रो बृहत्पत्रः पट्टीलाक्षाप्रसादनः ।
लोध्रो ग्राही लघुः शीतश्चक्षुष्यः कफपित्तनुत् ।
कषायो रक्तपित्तासृग्ज्वरातीसारशोथहृत् ॥"
इति भावप्रकाशः ॥
(तथा च ।
"तिल्वकस्तु मतो लोध्रो बृहत्पत्रस्तिरीटकः ।
तस्य मूलत्वचं शुष्कामन्तर्व्वल्कलवर्ज्जिताम् ॥
चूर्णयेत् त्रिधा कृत्वा द्वौ भागौ चाश्रतेऽततः ।
लोध्रस्यैव कषायेण तृतीयं तेन भावयेत् ॥
भागं तं दशमूलस्य पुनः क्वाथेन भावयेत् ।
शुष्कं चूर्णं पुनः कृत्वा तत ऊर्द्ध्वं प्रयोजयेत् ॥
दधितक्रसुरामण्डमूत्रैर्वदरशीधुना ।
रसेनामलकानां वा ततः पाणितलं पिबेत् ॥"
"सुरां लोध्रकषायेण जातां पक्वस्थितां पिबेत् ॥"
इति चरके कल्पस्थाने नवमेऽध्याये ।)

लोध्रकवृक्षः, पुं, (लोध्र एव लोध्रकः । स एव वृक्षः ।) लोधः । इति राजनिर्घण्टः ॥

लोपः, पुं, छेदः । आकुलीभावः । लुपधातोर्भावे घञ्प्रत्ययेन निष्पन्नोऽयम् । (अभावः । यथा, रघुः । १ । ६८ ।
"सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः ।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः ॥")
व्याकरणमते वर्णनाशः । तथा हि । नाशविधिर्यथा । लोपोऽस्त्रोमाङोरित्यादि ॥ अपि च ।
"सकलेभ्यो विधिभ्यः स्याद्बली लोपविधिस्तथा ।
लोपस्वरादेशयोस्तु स्वरादेशो विधिर्ब्बली ॥"
इति दुर्गादासः ॥

लोपा, स्त्री, अगस्त्यमुनिपत्नी । इति जटाधरः ॥

लोपाकः, पुं, (लोपं शीघ्रमदर्शनं अकति प्राप्नोतीति । अक् + अण् ।) शृगालः । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । १ । ४६ ।
"श्वाविच्छल्यकगोधाशशवृषदंशलोपाकलोमशकर्णकदलीमृगप्रियकाजगरसर्पमूषिकनकुलमहावभ्रुप्रभृतयो विलेशयाः ॥")

लोपापकः, पुं, (लोपं द्रुतमदर्शनं आप्नोतीति । आप् + ण्वुल् ।) शृगालः । इति शब्दमाला ॥

लोपापिका, स्त्री, (लोपापक + स्त्रियां टाप् । अत इत्वम् ।) शृगाली । इति शब्दमाला ॥

लोपामुद्रा, स्त्री, अगस्त्यमुनिभार्य्या । इत्यमरः ॥ लोपयति योषितां रूपाभिमानमिति लोपा पश्चाद्यन् आमुद्रयति सर्व्वः स्तुहिमिति आमुद्रा अन् ततः कर्म्मधारयः । किंवा न मुदं राति अमुदा पतिशुश्रूषाया लोपे अमुदा लोपामुद्रा । लोपा च ।
"लोपामुद्रा तु वैदर्भी लोपा स्त्री कुम्भजन्मनः ॥"
इति कण्ठभूषणम् । इति भरतः ॥*॥
अस्या अर्घ्यदानप्रसङ्गेन अगस्त्यार्घ्यदानं लिख्यते । अगस्त्यार्घ्यदानन्तु सौरेण सिंहराशौ विधानात् । यथा, ब्रह्मवैवर्त्ते ।
"अप्राप्ते भास्करे कन्यां शेषभूतैस्त्रिभिर्दिनैः ।
अर्घ्यं दद्युरगस्त्याय गौड़देशनिवासिनः ॥"
नारसिंहे ।
"शङ्खे तोयं विनिक्षिप्य सितपुष्पाक्षतैर्युतम् ।
मन्त्रेणानेन वै दद्याद्दक्षिणाशामुखस्थितः ॥
काशपुष्पप्रतीकाश अग्निमारुतसम्भव ।
मित्रावरुणयोः पुत्र कुम्भयोने नमोऽस्तु ते ॥"
प्रार्थनन्तु ।
"आतापिर्भक्षितो येन वातापिश्च महासुरः ।
समुद्रः शोषितो येन स मेऽगस्त्यः प्रसीदतु ॥"
गन्धादिकन्तु अगस्त्याय नम इत्यनेन देयं विशेषानुदेशे सामान्यतः प्राप्तत्वात् ।
दक्षिणाशामुखस्थित इति गन्धादावपि प्रयोगाङ्गकर्त्तृधर्म्मत्वादिति रत्नाकरः ॥*॥
तत्पत्न्यर्घ्यदानमन्त्रस्तु ।
"लोपामुद्रे महाभागे राजपुत्रि पतिव्रते ।
गृहाणार्घ्यं मया दत्तं मैत्रावरुणिवल्लभे ॥"
इति मलमासतत्त्वम् ॥